# झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्,
# राँची, झारखण्ड

वार्षिक परीक्षा-2024

## MODEL QUESTION

| कक्षा -10 | विषय – संस्कृत | पूर्णांक – 80 | समय – 3 घंटा |
|---|---|---|---|
| **CLASS-10** | **SUBJECT- SANSKRIT** | **Full Marks-80** | **TIME- 3 HOUR** |

सामान्यनिर्देशाः-

1 सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव कर्तव्यानि।

2. प्रश्नानां संख्या: 52 सन्ति।

3.प्रश्नसंख्या 1 तः 30 पर्यन्तम् बहुविकल्पीया: सन्ति।

4. प्रश्नसंख्या 31 तः 38 पर्यन्तम् अतिलघूत्तरीयाः प्रश्नाः सन्ति । अस्य कृते 2-2 अंकौ निर्धारितौ स्तः। केचन षड् प्रश्नान् उत्तरत।

4.प्रश्नसंख्या 39 तः 46 पर्यन्तम् लघूत्तरीयाः प्रश्नाः सन्ति। अस्य कृते 3- 3 अंका: निर्धारिताः । केचन षड् प्रश्नाः समाधेयाः।

5. प्रश्नसंख्या 47 तः 52 पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः सन्ति । अस्य कृते 5-5 अंकाः निर्धारिताः। केचन चतुरः प्रश्नान् उत्तरत।

---

निर्देश:-**अधोलिखितं अपठितगद्यांशं पठित्वा विकल्पेभ्य: उत्तराणि चित्वा लिखत -**

**अपठितावबोधनम् -**

**मन, बुध्दि, अहंकारेति त्रयाणां तत्वानां समाहारः चित्त इति कथ्यते। चित्तस्य प्रकृतिः चञ्चलात्मिका अस्ति। सर्वेष्वपि कार्येषु साफल्यं प्राप्तुं चितस्य एकाग्रता आवश्यकी। चित्तस्य एकाग्रतायाः कृते महर्षि-पतञ्जलिना योगस्य उपदेशः कृतः। महर्षिणा योगसूत्रे लिखितम् - योगः चितवृत्तिनिरोधः।**

**उपर्युक्तं पद्याशं पठित्वा उचितं विकल्पं चिनुत -**

**1. चित्तस्य प्रकृतिः कीदृशी**

(क) प्रमादात्मिका

(ख) निश्चलात्मिका

(ग) चञ्चलात्मिक

(घ) संशयात्मिका

2. चित्तवृत्तिनिरोधः कः?

क. भोगः

ख. नियोगः

ग. योगः

घ. रोगः

3. कार्येषु साफल्यं प्राप्तुं कस्य एकाग्रता आवश्यकी?

(क) चित्तस्य

(ख) धनस्य

(ग) धान्यस्य

घ. वित्तस्य

4.योगसूत्रस्य रचयिता कः

क. रामदेवः

ख,कामदेव :

ग. पतञ्जलि :

घ. वाल्मीकिः

निर्देशः-अधोलिखितं पठितगद्यांशं पठित्वा विकल्पेभ्यः उत्तराणि चित्वा लिखत-

झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, राँची
नवोन्मेष शोध नेतृत्व
JCERT

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः।

5.कः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्?

क.बालकः

ख.पुत्रः

ग.कृषकः

घ.जनकः

6.कृषकः काभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्?

क.कृपा

ख.वृषभम्

ग.बलीवर्दाभ्याम्

घ.कश्चित्

झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, राँची
नवोन्मेष शोध नेतृत्व
JCERT

7.एकः बलीवर्दः कीदृशः आसीत्?

क.सबलः ख.दुर्बलः

ग.ऋषभः घ.क्रुद्धः

8.'सबलः'इति पदस्य विपर्ययपदं किम्?

क.अहम् ख.एतस्मिन्

ग.दुर्बलः घ.चिरात्

निर्देशः-अधोलिखितं पठितगद्यांशं पठित्वा विकल्पेभ्यः उत्तराणि चित्वा लिखत-

संपत्तौ च विपत्तौ च महतामेकरूपता।

उदये सविता रक्तो रक्तश्चास्तमये तथा ॥

9.महतामेकरूपता कुत्र भवति ?

क.संपत्तौ

ख.विपत्तौ

ग.संपत्तौ च विपत्तौ च

घ.विपदि

10. उदयकाले सविताया: वर्ण: कीदृश: भवति?

क.श्वेत:

ख.रक्त:

ग. श्याम:

घ. नील:

11. 'सूर्य: ' इत्यस्य क: पर्यायपदम् अत्र प्रयुक्तम्?

क.संपत्तौ

ख.विपत्तौ

ग.रक्तो

घ. सविता

12.'विपत्तौ' पदे का विभक्ति:?

क. चतुर्थी

ख. पंचमी

ग. षष्ठी

घ. सप्तमी

निर्देश:- अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्य: चित्वा लिखत –

काक: - आम् सत्यं कथितं त्वया वस्तुतः वनराजः भवितुं तु अहमेव योग्य:।

पिक: - (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का-का इति कर्कशध्वनिना वातावरणमाकुलीकरोषि। न रूपम्, न ध्वनिरस्ति। कृष्णवर्णम् मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम् ?

काक: - अरे ! अरे ! किं जल्पसि ? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्ङ्गः? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा-'अनृतं वदसि चेत् काकः दशेत्' इति प्रकारेण। अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम्। अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते।

पिक:- अलम् अलम् अतिविकत्थनेन। किं विस्मर्यते यत्- काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयो:।

वसन्तसमये प्राप्ते काकः काकः पिकः पिक:।।

प्रश्ना:-

13. काकस्य वर्ण: कीदृश: भवति ?

क.श्वेत:

ख.रक्त:

ग. कृष्ण:

घ. नील:

14. कस्यां ऋतौ काक: काकः पिकः पिकः?

क.शरद्ऋतौ

ख.वसन्तऋतौ

ग.ग्रीष्मऋतौ

घ.वर्षाऋतौ

15.”अलम् अलम् अतिविकत्थनेन’’ अत्र रेखांकितपदे का विभक्ति:?

क. प्रथमा

ख. द्वितीया

ग. तृतीया

घ. चतुर्थी

16.’ कोकिला’ अस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

क.काक:

ख.वनराज:

ग.अनृतम्

घ.पिक:

निर्देश:-रेखांकितपदेषु प्रश्नवाचकपदानि चित्वा लिखत-

17.व्यायामं कुर्वत: विरुद्धं भोजनम् अपि परिपच्यते।

क.केषां ख.कीदृशम्

ग.कस्य

घ.के

18.धेनूनाम् माता सुरभि: आसीत्।

क.कति ख.कासाम्

ग.केभ्य:

घ.केन

19.शकटीयानम् कज्जलमलिनं धूमं मुञ्चति।

क.केषां

ख.कीदृशम्

ग.कस्य

घ.के

20 उद्याने पक्षिणां कलरवं चेत: प्रसादयति।

क.कति

ख.कासाम्

ग.केभ्य:

घ.केषाम्

निर्देश:- अधोलिखितवाक्येषु रेखांकितपदानां सन्धिं विच्छेदं वा चित्वा लिखत-

21.कश्चन निर्धनो जन: किञ्चिद् वित्तमुपार्जितवान्।

क.क:+चन

ख.कश्+चन

ग.क+श्चन

घ.क:+श्चन

22.राजासनं खल्वेतत्।

क.खलु+ वेतत्

ख.खल् + वेतत्

ग.खलु + एतत्

घ.खल्व +एतत्

23.पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।

नवोन्मेष शोध नेतृत्व
JCERT

क.पिता+स्य

ख.पिता+आस्य

ग.पिता+अस्य

घ.पितास्+च

24.जयतु+आर्यः।

क.जयत्वार्यः

ख.जयत्वर्यः

ग.जयतुआर्य :

घ.जयत्र्वर्यः

निर्देशः- रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा समुचितं विकल्पं चित्वा लिखत-

25.जीवने सर्वेषां प्राणिनां महत्त्वं विद्यते।

क.महत्+ त्व

ख.महान् + त्वम्

ग.महत् +तु

घ.महत् + तवम्

26.उद्यानस्य रमणीय+ तल् मनोरमा भवति।

क.रमणीयः

ख.रमणीयता

ग.रमणीया

घ.रमणीयताम्

27.बालिका वनं गच्छति।

क.बालिक: + ङीप्

ख.बालक+ टाप्

ग.बालक:+ डाप्

घ.बालिका+ आप्

निर्देश:- उचित-अव्ययपदं विकल्पेभ्य: चित्वा रिक्तस्थानानि पूरयत-

28. वृक्षस्य ..... नीडेषु खगाः निवसन्ति।

क.साकं

ख.उपरि

ग.एकदा

घ.नीचै:

29.......... अहं वने व्याघ्रम् अपश्यम्।

क.साकं

ख.उच्चै:

ग.एकदा

घ.वृथा

30.मूर्खाः जनाः .......... कालं यापयन्ति।

क.अभित:

ख.उपरि

ग.एकदा

घ.वृथा

झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, राँची
नवोन्मेष शोध नेतृत्व
JCERT

Class- 10 (Sanskrit)

## उत्तराणि-

1.ग. चञ्चलात्मिका

2.ग. योगः

3.क. चित्तस्य

4.ग. पतञ्जलि :

5.ग.कृषक:

6.ग.बलीवर्दाभ्याम्

7.ख.दुर्बल:

8.ग.दुर्बल:

9.ग.संपत्तौ च विपत्तौ च

10.ख.रक्त:

11.घ. सविता

12.घ. सप्तमी

13.ग. कृष्ण:

14.ख.वसन्तऋतौ

15.ग. तृतीया

16.घ.पिक:

17.ख.कीदृशम्

18. ख.कासाम्

19. ख.कीदृशम्

20.घ.केषाम्

21.क.क:+चन

22.ग.खलु + एतत्

23.ग.पिता+अस्य

24.क.जयत्वार्य:

25.क.महत्+ त्व

26.ख.रमणीयता

27.ख.बालक+ टाप्

28.ख.उपरि

29.ग.एकदा

30.घ.वृथा

**(अति लघूत्तरीया: प्रश्ना:)**

**निर्देश:- अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

**कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।**

**31 निर्धनस्य पुत्र: कुत्र निवसन् अध्ययने संलग्नः समभूत्?**

**32. निर्धनो जनः कं द्रष्टुं प्रस्थितः?**

**निर्देश:- अधोलिखितं पद्यं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**

**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ।**

**33. क: पुत्राय बाल्ये विद्याधनं यच्छति?**

**34. 'कृतघ्नता' अस्य विलोमपदं किम् अत्र प्रयुक्तम्?**

**निर्देश:- अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

**ज्वालामुखपर्वतानां विस्फोटैरपि भूकम्पो जायते इति कथयन्ति भूकम्पविशेषज्ञाः।**

**पृथिव्याः गर्भे विद्यमानोऽग्निर्यदा खनिजमृत्तिकाशिलादिसञ्चयं क्वथयति तदा तत्सर्वमेव लावारसताम् उपेत्य दुर्वारगत्या धरां पर्वतं वा विदार्य बहिर्निष्क्रामति। धूमभस्मावृतं जायते तदा गगनम्। सेल्सियश-ताप-मात्राया अष्टशताङ्कतामुपगतोऽयं लावारसो यदा नदीवेगेन प्रवहति तदा पार्श्वस्थग्रामा नगराणि वा तदुदरे क्षणेनैव समाविशन्ति।**

**35.भूकम्पविशेषज्ञाः भूकम्पविषये किं कथयन्ति?**

**36. यदा पृथिव्याः गर्भे विद्यमानोऽग्नि खनिजमृत्तिकाशिलादिसञ्चयं क्वथयति तदा किं भवति ?**

**निर्देशः- अधोलिखितं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत –**

**व्याघ्रः- गच्छ, गच्छ जम्बुक ! त्वमपि किञ्चिद् गूढप्रदेशम्। यतो व्याघ्रमारीति व शास्त्रे श्रूयते तयाहं हन्तुमारब्धः परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः।**

**शृगालः- व्याघ्र ! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि?**

**व्याघ्रः- प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा।**

**जम्बुकः- स्वामिन् ! यत्रास्ते सा धूर्ता तत्र गम्यताम्। व्याघ्र ! तव पुनः तत्र गतस्य सा सम्मुखमपीक्षते यदि, तर्हि त्वया अहं हन्तव्यः इति।**

**व्याघ्रः - शृगाल ! यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात्।**

**37. व्याघ्रं कः अकथयत्-मानुषादपि बिभेषि?**

**38.व्याघ्रः जम्बुकं कुत्र गन्तुं कथयति?**

**(लघूत्तरीयाः प्रश्नाः-)**

**39.निर्देशः-अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत-**

**श्लोक :**

**विचित्रे खलु संसारे नास्तिकिञ्चित् निरर्थकम्। अश्वश्चेद् धावने वीरः भारस्य वहने खरः ॥**

**अन्वयः**

**विचित्रे संसारे खलु किञ्चित्—-1---नास्ति।अश्वः चेत् —--2—---वीरः तर्हि भारस्य वहने —---3—---वीरः अस्ति।**

**मञ्जूषा**

**( खरः, निरर्थकम्, धावने )**

**40.अधोलिखित - श्लोकस्य भावार्थ मंजूषायाः उचित पदानि चित्वा लिखन्तु-**

**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**

**परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ॥**

भावार्थः - भावः अस्ति यत् यः नरः सत्यां धर्मयुक्ताम् वाणीं त्यक्त्वा—-(i)---------वाचं वदेत् स:पक्वं फलं त्यक्त्वा —-----(ii)----- फलं खादति अर्थात् तस्य नरस्य वाण्यां सरसता—---(iii) —--मधुरता च न भवति ।

मञ्जूषा- (कठोराम्, , अपक्वम्, मूर्खबुद्धिः, )

41. अंकानां स्थाने संस्कृते समयं लिखत -

क. स: प्रात: —-9.15—- वादने विद्यालयं गच्छति।

ख. अहं सायं —-5.30—-वादने क्रीडनाय गच्छामि।

ग. ह्य: त्वं —--8.45—---वादने कुत्र आसी:?

42. कोष्ठकेषु दत्तेषु धातुषु निर्देशानुसारं परिवर्तनं विधाय रिक्तस्थानानि पूरयत-

(क) समग्रं भारतम् उल्लासे मग्नः —-----।(अस् + लट् लकारे)

(ख) भूकम्पविभीषिका कच्छजनपदं विनष्टं ….-----।(कृ+ क्तवतु ङीप्)

(ग) क्षणेनैव प्राणिनः गृहविहीनाः —------।(भू लङ्, प्रथम-पुरुषः बहुवचनम्)

43. अधोलिखितवाक्येषु रेखांकितपदानि संशोध्य लिखत-

(i) स: <u>कन्दुकात्</u> क्रीडति।

(ii) <u>अहं</u> कुत्र गच्छसि?

(iii) <u>मार्गस्य</u> उभयत: वृक्षा: सन्ति।

44.अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा

विकल्पेभ्य: चित्वा लिखत-

(क) देवदत्तः <u>अहर्निशं</u> प्रयत्नं करोति ।

(i) अहम् च निशम् च

(ii) अहश्च निशा च

(iii) अह च निशा च

(iv) अहः च निशम् च ।

(ख) सरस्वत्याः कोशः न पूर्वः विद्यते।

(i) अपरः

(iii) अपूर्वः

(ii) अपूर्वम्

(iv) अद्वितीयः ।

(ग) दुष्यन्तः तपोवने अनुमृगं धावति।

(i) मृगस्य पश्चात्

(iii) मृगस्य सकाशम्

(ii) मृगेण युगपत्

(iv) मृगस्य समीपम् ।

45.अधोलिखितपदानां समानार्थकपदैः सह मेलनं कुरुत-

(i) रसालम् - सत्वरम्

(ii) उद्यमः - शक्रः

(iii)सुतः- आम्रम्

(iv)शीघ्रम्- तुरगः

(v)अश्वः- परिश्रमः

(v i) इन्द्रः पुत्रः

46.अत्र उदाहरणमनुसृत्य अधोलिखितानि पदानि प्रयुज्य पञ्चवाक्यानि रचयत-

यथा निष्क्रम्य - शिक्षिका पुस्तकालयात् निष्क्रम्य कक्षां प्रविशति।

झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, राँची
नवोन्मेष शोध नेतृत्व
JCERT

**(क) उपसृत्य—-----------।**

**(ख) प्रविश्य—-------------।**

**(ग) द्रष्टुम्—-----------------।**

**47.भवान् शशांक:। पितरं प्रति लिखिते अस्मिन् पत्रे मञ्जूषापदसहायतया रिक्त स्थानानि पूरयित्वा उत्तराणि लिखत।**

**—-(i)------**

**तिथि: 12. 12. 2024**

**पूज्यपितृचरणा:**

**सादरं प्रणामा: !**

**अत्र —-(ii)-------तत्रास्तु।भवत: पत्रं ह्य: सायंकाले एव लब्धम् । भवान् छात्रावासस्य भोजनादिकस्य—--- (iii)---- प्रति शंकिता अस्ति इति पत्रमाध्यमेन ज्ञातम्। -----(iv) —--छात्राणां कृते भोजनस्य उत्तमा व्यवस्था अस्ति। प्रत्यहम् अत्र—-- (v) —--छात्रेभ्य: रुचिकरं स्वच्छं च —-(vi)----- दीयते। छात्रावास - अधीक्षक: महोदय: —-(vii) —-स्वच्छता-विषये—--- (viii)------ प्रयत्नशील: तिष्ठति। आशासे यत् गृहे सर्वे —-(ix) —-भविष्यन्ति।मातरं प्रति मम प्रणामा: निवेदनीया:।**

**भवत:**

**(x)**

**शशांक:**

**मञ्जूषा**

**( सर्वेभ्य:, छात्रावासे, कुशलं, व्यवस्थां, भोजनस्य, वंशवद:, कुशलिन:, सदैव, भोजनं, नवोदय विद्यालय: )**

**48. अधोदत्तं चित्रं दृष्ट्वा प्रदत्तमञ्जूषापदसहायतया संस्कृतभाषायां पञ्चवाक्यानि रचयत-**



मञ्जूषा- उद्यानम्, सूर्यः, चटका, कन्दुकम्, पुष्पाणि, बालाः जनाः, क्रीडन्ति,वृक्षाः

49.कोष्ठकेषु दत्तेषु पदेषु यथानिर्दिष्टां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत-

(क) सः —------निष्क्रम्य बहिरगच्छत्। (गृहशब्दे पंचमी)

(ख) गृहस्थः—-------- आश्रयं प्रायच्छत्। (अतिथिशब्दे चतुर्थी)

(ग) तौ —-------प्रति प्रस्थितौ। (न्यायाधिकारिन् शब्दे द्वितीया)

(घ) —-----चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे। (इदम् शब्दे सप्तमी)

(ङ) चौरस्य —------प्रबुद्धः अतिथिः। (पादध्वनिशब्दे तृतीया)

50.अधोलिखितवाक्येषु रेखांकितपदमाधृत्य प्रश्न- निर्माणं कुरुत-

(i) त्वं मानुषात् विभेषि ।

(ii) गजः वन्यपशून् तुदन्तं शुण्डेन पोथयित्वा मारयति।

(iii) वानरः आत्मानं वनराजपदाय योग्यः मन्यते।

(iv) राजहंसेन सरसः शोभा भवति।

(v) एतादृशी भयावहघटना गढवालक्षेत्रे घटिता।

51. अधोलिखितवाक्यानि कथाक्रमानुसारेण पुनः लिखत-

(क) प्रत्युत्पन्नमतिः सा शृगालं आक्षिपन्ती उवाच।

(ख) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।

(ग) मार्गे सा एकं व्याघ्रम् अपश्यत्।

(घ) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच-अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्।

(ङ) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता।

(च) 'त्वं व्याघ्रत्रयम् आनेतुं' प्रतिज्ञाय एकमेव आनीतवान्।

52. 'मम विद्यालयः' विषयमधिकृत्य प्रदत्तमञ्जूषापदसहायतया संस्कृतभाषायां पञ्चवाक्यानाम् एकम् अनुच्छेदं लिखत-

(मञ्जूषा- प्रकोष्ठाः, पुस्तकालयः, वाटिका, शिक्षिकाः, प्राचार्यकक्षः, प्रार्थना सभा, भवनम्, संगणकयंत्राणि)

*********************************************

झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, राँची
नवोन्मेष शोध नेतृत्व
JCERT